।। कोबातीर्थमंडन श्री महावीरस्वामिने नमः ।।

।। अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ।।

।। गणधर भगवंत श्री सुधर्मास्वामिने नमः ।।

।। योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ।।

।। चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ।।

# आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

## पुनितप्रेरणा व आशीर्वाद

## राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

## जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १

**श्री महावीर जैन आराधना केन्द्र**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
**Websiet :** www.kobatirth.org
**Email :** Kendra@kobatirth.org

**शहर शाखा**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

# प्रास्ताविकश्लोक संग्रह

संग्राहक,

मुनि प्रियंकरविजय.

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

बाई समु दलीचंद जैन ग्रंथमाला नं. ५

# प्रास्ताविकश्लोक संग्रह ।

किमत ६ आना

संग्राहकः ।
मुनि प्रियंकरविजय

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रकाशकः ।
एम. एन. दलाल ।
सेक्रेटरी : बाई समु दलीचंद जैन ग्रन्थमाला
लांघणज (उ. गुजरात)

मुद्रक :-
शेठ गुलाबचंद देवचंद
आनंद प्रिन्टिंग प्रेस-भावनगर.

प्रथमावृत्ति
५००
१९४५

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

# दो शब्द ।

प्रस्तुत पुस्तिका का नाम भिन्न २ स्थल से श्लोक संग्रह किया गया है इस से " प्रास्ताविक श्लोक संग्रह " रखा गया है । जिसमें भिन्न २ प्रकार की नीति के श्लोक है । व्याख्यान-कारों में इस से महद् लाभ होने की संभावना है । विद्वद्वर्ग की पीछे बाल जीवों को भी कुच्छ लाभ हो उसी उद्देश से हिन्दी पदों का भी संग्रह इस लघु पुस्तिका में किया गया है । इस से उम्मेद है कि दोनू वर्ग महद् लाभ उठायेगा । यदि दोनू वर्ग में इनका सत्कार होगा तो इसी तरह और भी संग्रह जनता की सेवा में अर्पित किया जायगा ।

—प्रियंकरविजय

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

# वचनामृत

दुनिया लकीरों का बाज़ार है।

प्रलोभन और पॉलीसी स्वार्थी संसार को हस्त करने का अजब जादू है।

मानव जीवन यहीं मनुष्य जीवन की शाळा है।

अज्ञानता मानव जीवन की घातक है।

संकट से मनुष्य जीवन के चक्षु खुल जातें है।

जमाना बुद्धिवाद का है और आप उनके प्रचारक है।

वीर पुरुष प्राण के भयसे दीनता को कभी धारण नहीं करते।

अध्यात्मवाद ही निश्चित सुख की कुञ्ची है।

शरीर मन और वाणी को स्वतंत्र बनाओ।

–प्रियंकरविजय

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

# प्रास्ताविक श्लोक संग्रह

कोटं च बूटं च पतलून दिव्यं,
चूटी मुखे चंचल मन द्वितीयं ।
लेडी गुलामं शुभकर्महीनं,
तं जेन्टनमेनं मुनयो गदन्ति ॥ १ ॥

अङ्गं गलितं पलितं मुण्डं,
जातं दशन विहीनं तुण्डम् ।
वृद्धो याति गृहीत्वा दण्डं,
तदपि न मुञ्चत्याशापिण्डम् ॥ २ ॥

श्रुतिर्विभिन्ना स्मृतयश्च भिन्ना,
नैको मुनिर्यस्य वचोऽप्रमाणम् ।
धर्मस्य तत्त्वं निहितं गुहायां,
महाजनो येन गतः स पन्थाः ॥ ३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अर्थातुराणां न पिता न बंधुः,
कामातुराणां न भयं न लज्जा ।
क्षुधातुराणां न बलं न तेजः,
चिन्तातुराणां न सुखं न निद्रा ॥ ४ ॥

चतुरः सखि मे भर्ता,
यल्लिखति स तत् परो न वाचयति ।
तस्मातथाधिकोमे,
स्वयमपि लिखितं स्वयं न वाचयति ॥ ५ ॥

पिबंति नद्यः स्वयमेव नाम्भः,
खादन्ति तं न स्वादुफलानि वृक्षाः ।
पयोमुखः किं विलसंति सस्यं,
परोपकारः सतां विभूतयः ॥ ६ ॥

चिन्तितं तदिह दूरतरं प्रयाति,
यच्चेतसा न गणितं तदिहाऽभ्युपैति ।
प्रातर्भवामि वसुधाऽधिप चक्रवर्ती,
सोऽहं व्रजामि विपिने जटिलः तपस्वी ॥ ७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



द्यूतं च मांसं च सुरा च वेश्या,
पापर्द्धि चौर्यं परदारसेवा ।
एतानि सप्त व्यसनानि लोके;
घोरातिघोरं नरकं नयन्ति ॥ ८ ॥

त्यजन्ति मित्राणि धनैर्विहीनं,
पुत्राश्च दाराश्च सहोदराश्च ।
तमर्थवन्तं पुनराश्रयन्ति;
अर्थो हि लोके पुरुषस्य बन्धुः ॥ ९ ॥

मार्गे मार्गे निर्मलं ब्रह्मवृन्दं,
वृन्दे वृन्दे तत्त्वचिन्तानुवादः ।
वादे वादे जायते तत्त्वबोधो,
बोधे बोधे भासते चन्द्रचूडः ॥ १० ॥

पुष्पेषु चम्पा नगरीषु लङ्का,
नदीषु गङ्गा च नृपेषु रामः ।
योषित्सु रंभा पुरुषेषु विष्णुः,
काव्येषु माघः कविकालिदासः ॥ ११ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्रावासिको व्याधियुतः सरोषो,
विद्यार्थिचिः परदाररक्तः ।
यस्यास्ति वैरी हि वियोगितोऽपि,
ह्यष्टौ लभंते मनुजा न निद्राम् ॥ १२ ॥

बालः पश्यति लिंगं,
मध्यमबुद्धिर्विचारयति वृत्तम् ।
आगमतत्त्वं तु बुधः
परीक्षते सर्वयत्नेन ॥ १३ ॥

दानेन पाणिर्नतु कंकणेन,
मानेन तृप्तिर्न तु भोजनेन ।
धनेन कान्तिर्न तु चन्दनेन,
ध्यानेन मुक्तिर्न तु दर्शनेन ॥ १४ ॥

बुद्धेः फलं तत्त्वविचारणं च,
देहस्य सारं व्रतधारणं च ।
अर्थस्य सारं किल पात्रदानं,
वाचः फलं प्रीतिकरं नराणाम् ॥ १५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



किं मोक्तिहारं न च मर्कटस्य,
मिष्टान्नपानं न च गर्दभस्य ।
अन्धस्य दीपं बधिरस्य गीतं,
मूर्खस्य किं धर्मकथाप्रसंगः ? ॥ १६ ॥

अकर्णस्य कर्णे कथं गीतगानं,
विना नाशिकायां कथं धूपगंधः ।
अकंठस्य कंठे कथं पुष्पमाला,
अपादस्य पादे कथं मे प्रणामः ॥ १७ ॥

कार्येषु मंत्री कर्मेषु दासी,
भोज्येषु माता शयनेषु रंभा ।
मनोऽनुकूला क्षमया धरित्री,
षड्गुणभार्या कुलमुद्धरति ॥ १८ ॥

पुत्रश्च मूर्खो विधवाश्च कन्या,
शठं च मित्रं चपलं कलत्रम् ।
विलासकालेऽपि दरिद्रता च,
विनाऽग्निना पञ्च दहन्ति देहम् ॥ १९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



ग्रामो नास्ति कुतः सीमा,
धर्मो नास्ति कुतः सुखम् ।
दानं नास्ति कुतः कीर्ति-
र्भार्या नास्ति कुतः सुतः ॥ २० ॥

क्वचिद् भूमौ शय्या क्वचिदपि च पर्यङ्कशयनम्,
क्वचिच्छाखाहारी क्वचिदपि शाल्योदनरुचिः ।
क्वचित् कन्थाधारी क्वचिदपि च दिव्याम्बरधरो,
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥ २१ ॥

द्वौ हस्तौ द्वौ च पादौ च दृश्यते मनुजाकृतिः,
अहो ! कपीन्द्र ! राजेन्द्र ! गृहं किन्न करिष्यति ।
सुचि मुखे दुराचारे रण्डे पंडित मानिनि,
असमर्थो गृहकारणे समर्थो गृहभञ्जने ॥ २२ ॥

वृक्षं क्षीणं फलं त्यजन्ति विहगाः शुष्कं सरः सारसाः,
निर्द्रव्यं पुरुषं त्यजन्ति गणिका भ्रष्टं नृपं सेवकाः ।
निर्गन्धं कुसुमं त्यजन्ति मधुपा दग्धं वनान्तं मृगाः;
सर्वे स्वार्थवशाज्जनोऽभिरमते नो कस्यचिद् (को)वल्लभः ॥ २३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



काकः पद्मवने रतिं न कुरुते हंसो न कूपोदके,
मूर्खः पण्डितसङ्गमे न रमते दासो न सिंहासने ।
कुस्त्री सज्जनसङ्गमे न रमते नीचं जनं सेवते,
या यस्य प्रकृत्तिः स्वभावजनिता केनापि न त्यज्यते ॥२४॥

धैर्यं यस्य पिता क्षमा च जननी शान्तिश्चिरं गेहिनी,
सत्यं सुनूरयं दया च भगिनी भ्राता मनः संयमः ।
शय्या भूमितलौ दिशोऽपि वसनं ज्ञानामृतं भोजनम्,
एते यस्य कुटुम्बिनो वद सखे ! कस्माद् भयं योगिनः ॥२५॥

हस्तौ दानविवर्जितौ श्रुतिपुटं सारश्रुतं द्रोहिणौ,
नेत्रे साधु विलोकनेन रहिते पादौ न तीर्थं गतौ ।
अन्यायार्जितवित्तपूर्णमुदरं गर्वेण तुङ्गं शिरो;
रे ! रे ! जम्बुक मुञ्च मुञ्च सहसा नीचस्य निद्यं वपुः ॥२६॥

साधुभ्यः साधूदानं रिपुजनसुहृदां चोपकारं कुरु त्वं,
सौजन्यंबन्धुवर्गो निजहितमुचितं स्वामि कार्यं यथार्थं ।
श्रोतेते तथ्यमेतद् कथयति सततां लेखिनी भाग्यशालिनः;
नोचेन्नष्टेऽधिकारे मम मुखदर्श तावकास्यं भवेद्भिः ॥ २७॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



धर्मः पर्वगतस्तपः कपटतः सत्यं च दूरे गतं,
पृथ्वी मंदफला नृपाश्च कुटिलाः शस्त्रायुधा ब्राह्मणाः ।
लोकः स्त्रीषु रतः स्त्रियोऽति चपला लौल्ये स्थिता मानवाः;
साधुः सीदति दुर्जनः प्रभवति प्रायः प्रविष्टः कलिः ॥ २८ ॥

निर्वीर्या पृथिवी निरौषधिरसा नीचा महत्त्वं गता,
भूपाला निजधर्मकर्मरहिता विप्राः कुमार्गे रताः ।
भार्या भर्तृवियोगिनी पररता पुत्राः पितुर्द्वेषिणो;
हा ! कष्टं खलु दुर्लभाः कलियुगे धन्या नराः सज्जनाः ॥२९॥

विद्यानाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं,
विद्या भोगकरी यशः सुखकरी विद्या गुरूणा गुरुः ।
विद्या बधुजनो विदेशगमने विद्या परा देवता,
विद्या राजसु पूजिता न तु धनं विद्याविहीनः पशुः ॥ ३० ॥

भोगे रोगभयं सुखे क्षयभयं वित्तेऽग्निभूभृद्भयम्,
माने म्लानिभयं जये रिपुभयं वंशे कुयोषिद्भयम् ।
दास्ये स्वामिभयं गुणे खलभयं काये कृतांताद्भयम्,
सर्वनामभयं भयेदिह नृणां वैराग्यमेवाभयम्, ॥ ३१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



विद्वत्ता वसुधातले विगलिता पाण्डित्यधर्मो गतः,
श्रोतृणां हृदयेष्वबुद्धिरधिका ज्ञानं गतं चारणे ।
गाथागीतविनोदवाक्यरचना युक्त्या जगंद्रंजितं,
ज्योतिर्वैद्यकशास्त्रसारमखिलं शूद्रेषु जातं कलौ ॥ ३२ ॥

नाहं स्वर्गफलोपभोगरसिको नाभ्यर्चितस्त्वं मया,
संतुष्टस्तृणभक्षणेन सततं साधो न युक्तं तव ।
स्वर्गे यांति यदि त्वया विनिहता यज्ञे ध्रुवं प्राणिनो,
यज्ञं किं न करोषि मातृपितृभिः पुत्रैस्तथा बांधवैः ॥ ३३ ॥

मौने मौनी गुणिनि गुणवान् पण्डिते पण्डितोऽसौ,
दीने दीनः सुखिनि सुखवान् भोगिनि प्राप्तभोगः ।
मूर्खे मूर्खो युवतिषु युवा वाग्मिषु प्रौढवाग्मि,
धन्यः कोऽपि त्रिभुवनजयी योऽवधूतेऽवधूतः ॥ ३४ ॥

काया हंस विना नदी जल विना दातुर्विना याचकाः,
भ्राता स्नेह विना कुलं सुत विना धेनुश्च दुग्धं विना ।
भार्या भक्ति विना पुरं नृप विना वृक्षं च पत्रं विना,
दीपः स्नेह विना शशी निशि विना धर्म विना मानवाः॥३५॥

For Private And Personal

उद्यति यदि भानुः पश्चिमायां दिशायां,
विकसति यदि पद्मं पर्वताग्रे शिलायाम् ।
प्रचलति यदि मेरुः शीततां याति वह्नि-
स्तदपि न चलतीयं भाविनी कर्मरेखा ॥ ३६ ॥

भिक्षो कन्था श्लथाते नहि सफरवधे जालमश्नासि मत्स्यान्,
ते वै मद्योपदंशाः पिबसि मधुसमं वेश्यया यासि वेश्याम् ।
दत्वाङ्घ्रि मूर्ध्न्यरीणां तव किमु रिपवो भित्ति भेत्तास्मि येषाम्,
चौरोऽसि द्यूतहेतोस्त्वयि सकलमिदं नास्ति नष्टे विचारः॥३७॥

दुःखं स्त्रीकुक्षिमध्ये प्रथमिह भवेद्गर्भवासे नराणां,
बालत्वे चापि दुःखं मललुलितवपुः स्त्रीपयःपानमिश्रम् ।
तारुण्ये चापि दुःखं भवति विरहवं वृद्धभावोऽप्यसारः;
संसार रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किंचित् ॥३८॥

नास्तिक्यं वेदधर्मे जिनवरसुमते सर्वमिथ्यात्वभावः,
कौसग्यं चोद्धवीये भुवनसुविदिते वैष्णवेऽन्याश्रयत्वम् ।
साम्राज्येऽनार्यता यत् प्रचलति परमं म्लेच्छके काफरत्वं,
सर्वाघः पातकारी प्रसरति भयदो भारते भेदभावः ॥ ३९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पत्रं नैव यदा करीरविटपे दोषो वसन्तस्य किम्,
नोलूकोऽप्यवलोकते यदि दिवा सूर्यस्य किं दूषणम् ?
धारा नैव पतन्ति चातकमुखे मेघस्य किं दूषणं ?
यत्पूर्वं विधिना ललाटलिखितं तन्मार्जितुं कः क्षमः ॥ ४० ॥

कथमुत्पद्यते धर्मः, कथं धर्मो विवर्द्धते ।
कथं संस्थाप्यते धर्मः; कथं धर्मो विनश्यति ॥ ४१ ॥

सत्येनोत्पद्यते धर्मो, दया दानेन वर्द्धते ।
मायाः स्थाप्यते धर्म्मः, क्रोधलोभाद्विनश्यति ॥ ४२ ॥

अहिंसा लक्षणो धर्मः, अधर्मः प्राणिनां वधः ।
तस्माद्धर्मार्थिभिर्लोकैः, कर्तव्या प्राणिनां दया ॥ ४३ ॥

जीवानां रक्षणं श्रेष्ठं, जीवाजीवितकांक्षिणः ।
तस्मात् समस्तदानेभ्यो-ऽभयदानं प्रशस्यते ॥ ४४ ॥

न मांसभक्षणे दोषो, न मद्ये न च मैथुने ।
प्रवृत्तिरेषा भूतानां, निवृत्तिस्तु महाफलाः ॥ ४५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



राजा राजानमालोक्य, वैद्यो वैद्यं नटो नटम् ।
भिक्षुको भिक्षुकं दृष्ट्वा, श्वानवत् घुर्घुरायते ॥ ४६ ॥

कर्मणो हि प्रधानत्वं, किं कुर्वन्ति शुभाग्रहाः ।
वशिष्ठदत्तलग्नोऽपि, राम प्रव्रजितो वने ॥ ४७ ॥

दर्शने हरते चित्तं, स्पर्शने हरते बलम् ।
संगमे हरते वीर्यं, नारी प्रत्यक्ष राक्षसी ॥ ४८ ॥

आपदामाकरो नारी, नारी नरकवर्तिनी ।
विनाशकारणं नारी, नारी प्रत्यक्षराक्षसी ॥ ४९ ॥

पुरुषो विपदां खानिः, पुमान् नरकपद्धतिः ।
पुरुषः पाप्मनां मूलं, पुमान् प्रत्यक्षराक्षसः ॥ ५० ॥

अष्टादशपुराणेषु, व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय, पापाय परपीडनम् ॥ ५१ ॥

शठं प्रति शाठ्यं कुर्यात्, आदरं प्रति चादरं ।
त्वया समुच्यते पक्षः, मया च नाम्यते शिरः ॥ ५२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



किं गीतं कण्ठहीनस्य, किं रूपंगुणहीनस्य ।
किं धनं दानहीनस्य, मानहीनस्य भोजनम् ॥ ५३ ॥

नराणां नापितो धूर्तः, पक्षिणां चैव वायसः ।
पशूणां शृगालो धूर्तः, नारीणां चैव मालिका ॥ ५४ ॥

ब्राह्मणानां धनं विद्या, क्षत्रियाणां धनं धनुः ।
ऋषीणां च धनं सत्यं, योषिता यौवनं धनम् ॥ ५५ ॥

तुष्यन्ति भोजनैर्विप्रा, मयूरा घनगर्जितैः ।
साधवः परकल्याणैः, खला परविपत्तिभिः ॥ ५६ ॥

वैद्यराज ! नमस्तुभ्यं, यमराज सहोदर ! ।
यमस्तु हरते प्राणान्, त्वं च प्राणान् धनानि च ॥५७॥

उद्यमेन विना राजन्, सिद्धन्ति न मनोरथाः ।
कातरा इति जल्पन्ति, यद्भाव्यं तद्भविष्यति ॥ ५८ ॥

कामलुब्धे कुतो लज्जा, धर्महीने कुतः क्रिया ।
मद्यपाने कुतः शौच्चं, मांसाहारे कुतो दया ॥ ५९ ॥

For Private And Personal

अनित्यानि शरीराणि, विभवो नैव शाश्वतः ।
नित्यं सन्निहितो मृत्युः, कर्तव्यो धर्मसङ्ग्रहः ॥ ६० ॥

व्यापारे स्याद् द्विगुणं वित्तं, व्यवसाये चतुर्गुणम् ।
क्षेत्रे शतगुणं प्रोक्तं, पात्रेऽनन्तगुणं तथा ॥ ६१ ॥

मेधां पिपीलिका हन्ति, यूका कुर्याज्जलोदरम् ।
कुरुते मक्षिका वान्ति, कुष्ठरोगं च कोलिकः ॥ ६२ ॥

पुष्पं दृष्ट्वा फलं दृष्ट्वा, दृष्ट्वा नारी सुशोभितम् ।
एतानि त्रीणि वने दृष्ट्वा, कस्य न चलते मनः ॥ ६३ ॥

अलसस्य कुतो विद्या, अविद्यस्य कुतो धनम् ।
अधनस्य कुतो मित्र,ममित्रस्य कुतो बलम् । ॥ ६४ ॥

कीटिकासंचितं धान्यं, मक्षिकासंचितं मधु ।
कृपणे संचितं वित्तं, तदन्यैरेव भुज्यते ॥ ६५ ॥

पञ्चैतानि पवित्राणि, सर्वेषां धर्म चारिणाम् ।
अहिंसा सत्यमस्तेयं त्यागो मैथुनवर्जनम् ॥ ६६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



दानं सिद्धिनिदानं हि, देयमत्र महाधिया ।
न तरन्ति विना दानं, प्राणिनो भवसागरम् ॥ ६७ ॥

घटं भित्त्वा पटं छित्वा, कृत्वा रासभोहणं ।
येन केन प्रकारेण, प्रसिद्धः पुरुषो भवेत् ॥ ६८ ॥

उद्यमः साहसं धैर्यं, बलबुद्धिपराक्रमः ।
षडेते यस्य विद्यन्ते, तस्य देवोऽपि शंकते ॥ ६९ ॥

दानेन प्राप्यते लक्ष्मीः, शीलेन सुखसंपदा ।
तपसा क्षीयते कर्म, भावना भवनाशिनी ॥ ७० ॥

उत्तमाः स्वगुणैः ख्याता, मध्यमास्तु पितुर्गुणैः ।
अधमा मातुलैः ख्याता, श्वशुरैरधमाधमा ॥ ७१ ॥

चिन्तया नश्यते बुद्धिः, चिन्तया नश्यते बलम् ।
चिन्तया नश्यते ज्ञानं, व्याधिर्भवति चिन्तया ॥ ७२ ॥

उपदेशो हि मूर्खाणां, प्रकोपाय न शान्तये ।
पयःपानं भुजङ्गानां, केवलं विषवर्धनम् ॥ ७३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



उष्ट्राणां च गृहे लग्नं, गर्दभाः शान्तिपाठकाः ।
परस्परं प्रशंसन्ति, अहो रूपम् अहो ध्वनिः ॥ ७४ ॥

मुखं पद्म दलाकारं, वाणी चंदन शीतला ।
हृदय कर्तरी तुल्यं, त्रिविधं धूर्तलक्षणम् ॥ ७५ ॥

पिंडे पिंडे मतिर्भिन्ना, कुंडे कुंडे नवं पयः ।
जातौ जातौ नवाचारा, नवा वाणी मुखे मुखे ॥ ७६ ॥

शतं विहाय भोक्तव्यं, सहस्रं स्नानमाचरेत् ।
लक्षं विहाय दातव्यं, कोटिं त्यक्त्वा हरिं भजेत् ॥ ७७ ॥

पुण्यस्य फलमिच्छन्ति, पुण्यं नेच्छन्ति मानवः ।
न पापफलमिच्छन्ति, पापं कुर्वन्ति यत्नतः ॥ ७८ ॥

विद्यामित्रं प्रवासेषु, भार्या मित्रं गृहेषु च ।
व्याधि तस्यौषधं मित्रं; धर्मो मित्रं मृतस्य च ॥ ७९ ॥

गुणो भूषयते रूपं, शीलं भूषयते कुलम् ।
शान्तिर्भूषयते विद्यां, दानं भूषयते धनम् ॥ ८० ॥

For Private And Personal

शोभते विद्यया विप्रः, क्षत्रियो विजयेन वै ।
अर्थः पात्रे प्रदानेन, लज्जया च कुलाङ्गना ॥ ८१ ॥

कवयः किं न पश्यन्ति, किं न खादन्ति वायसाः ।
मद्यपा किं न जल्पन्ति, किं न कुर्वन्ति दुर्जनाः ॥ ८२ ॥

पादपानां भयं वातात्, पद्मानां शिशिराद् भयम् ।
पर्वतानां भयं वज्रात्, साधूनां दूर्जनाद् भयम् ॥ ८३ ॥

सत्येन धार्यसे पृथ्वी, सत्येन तपते रविः ।
सत्येन वायवो वान्ति, सर्वं सत्ये प्रतिष्ठितम् ॥ ८४ ॥

आत्मनो मुखदोषेण, बध्यन्ते सुकसारिकाः ।
बकास्तु नैव बध्यन्ते, मौनं सर्वार्थसाधनम् ॥ ८५ ॥

अहो दुर्जनसंसर्गा-न्मानहानिः पदे पदे ।
पावको लोहसङ्गेन; मुद्गरैरभिहन्यते ॥ ८६ ॥

अन्नदानं महादानं, विद्यादानं महत्तरम् ।
अन्नेन क्षणिका तृप्ति-र्यावज्जीवं तु विद्यया ॥ ८७ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



उद्यमेन हि सिध्यन्ति, कार्याणि न मनोरथैः ।
नहि सुप्तस्य सिंहस्य, प्रविशन्ति मुखे मृगाः ॥ ८८ ॥

सर्पदुर्जनयोर्मध्ये, वरं सर्पो न दुर्जनः ।
सर्पो दशति कालेन, दुर्जनस्तु पदे पदे ॥ ८९ ॥

साधूनां दर्शनं पुण्यं, तीर्थभूता हि साधवः ।
तीर्थं फलति कालेन, सद्यः साधुसमागमः ॥ ९० ॥

गीतशास्त्रविनोदेन, कालो गच्छति धीमताम् ।
व्यसनेन तु मूर्खाणां, निद्रया कलहेन वा ॥ ९१ ॥

गुणाः सर्वत्र पूज्यन्ते, पितृवंशो निरर्थकः ।
वासुदेवं नमस्यन्ति, वसुदेवं न मानवाः ॥ ९२ ॥

काचः काञ्चनसंसर्गाद्, धत्ते मारकतीं द्युतिम् ।
तथा सङ्गेन विदुषां, मूर्खो याति प्रवीणताम् ॥ ९३ ॥

आत्मार्थं जीवलोकेऽस्मिन्, को न जीवति मानवः ।
परं परोपकारार्थं, यो जीवति स जीवति ॥ ९४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



परोपकारशून्यस्य, धिङ् मनुष्यस्य जीवितम् ।
जीवन्तु पशवो येषां, चर्माऽप्युपकरिष्यति ॥ ९५ ॥

यथा परोपकारेषु, नित्यं जागर्ति सज्जनः ।
तथा पराऽपकारेषु, नित्यं जागर्ति दुर्जनः ॥ ९६ ॥

संधयेत सरला सूची, वक्रा छेदाय कर्तरी ।
अतो विमुच्य वक्रत्वं, गुणानेव समाश्रय ॥ ९७ ॥

दिवा पश्यति नो घूकः, काको नक्तं न पश्यति ।
अपूर्वः कोऽपि कामान्धो, दिवा नक्तं न पश्यति ॥९८॥

मूर्खा मूर्खैः समं संगं, गावो गोभिर्मृगा मृगैः ।
सुधीभिः सुधयो यांति, समशीले ही मित्रता । ९९ ॥

शतेषु जायते शूरः, सहस्रेषु च पण्डितः ।
वक्ता शतसहस्रेषु, दाता भवति वा न वा ॥ १०० ॥

रे रे ! मण्डक ! मारोदीर्यदहं खण्डितोऽनया ।
राम-रावण-मुञ्जाद्या, स्त्रीभिः के के न खण्डिताः? ॥१०१॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



रे रे ! यन्त्रक ! मा रोदीः, कं कं न भ्रमयन्त्यमुः ।
कटाक्षाक्षेपमात्रेण, करा कृष्टस्य का कथा ? ॥ १०२ ॥

वैरिणोऽपि हि मुच्यन्ते, प्राणान्ते तृणभक्षणात् ।
तृणाहारः सदैवैते, हन्यन्ते पशवः कथम् ॥ १०३ ॥

महाव्रति सहस्रेषु, वरमेको हि तात्त्विकः ।
तात्त्विकेन समं पात्रं, न भूतं न भविष्यति ॥ १०४ ॥

बालः पश्यति लिंगं, मध्यमबुद्धिर्विचारयति वृत्तम् ।
आगम तत्त्वं तु बुधः, परीक्षते सर्वयत्नेन ॥ १०५ ॥

उत्तमैः सह संगत्यं, पंडितैः सह सं कथाम् ।
अलुब्धैः सह मित्रत्वं, कुर्वाणो नैव सीदति ॥ १०६ ॥

अस्थिन वसति रूद्रश्च, मांसे चास्ति जनार्दनः ।
शुक्रे वसति ब्रह्मा च, तस्मान्मांसं न भक्षयेत् ॥ १०७ ॥

प्रमाणं यो न जानाति, भोजने वचनेषु च ।
अतिभोक्ता चातिवक्ता, प्राणी स प्राणघातकः ॥१०८॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



निद्रा मूलमनर्थानां, निद्रा श्रेयो विघातिनी ।
निद्रा प्रमादजननी, निद्रा संसारवर्द्धिनी ॥ १०९ ॥

संपदि यस्य न हर्षो, विपदि विषादो रणे च धीरत्वम् ।
तं भुवनत्रयतिलकं, जनयति जननी सुत विरलम् ॥११०॥

कृतकर्म क्षयो नास्ति, कल्पकोटिशतैरपि ।
अवश्यमेव भोक्तव्यं, कृतं कर्म शुभाशुभम् ॥ १११ ॥

दानं पूजा तपश्चैव, तीर्थसेवा श्रुतं तथा ।
सर्वमेव वृथा तस्य, यस्य शुद्धं न मानसम् ॥ ११२ ॥

दानेन प्राप्यते लक्ष्मीः, शीलेन सुखसंपदा ।
तपसा क्षीयते कर्म, भावना भव नाशिनी ॥ ११३ ॥

यावज्जीवं तु यो मांसं, विषवत् परिवर्जयेत् ।
वसिष्ठो भगवानाह, स्वर्गलोकं स गच्छति ॥ ११४ ॥

यूपं छित्वा पशून् हत्वा, कृत्वा रुधिरकर्दमान ।
यद्येवं गम्यते स्वर्गे, नरके केन गम्यते ? ॥ ११५ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



अश्वं नैव गजं नैव, व्याघ्रं नैव च नैव च ।
अजा पुत्रं बलिं दद्याद्, देवो दुर्बलघातकः ॥ ११६ ॥

ब्राह्मणोऽपि क्रियाहीनः, शूद्रात् प्रत्यवरो भवेत् ।
शूद्रोऽपि शील सम्पन्नो, गुणवान् ब्राह्मणो भवेत् ॥११७॥

क्षमा दानं दमो ध्यानं, सत्यं शौचं धृतिर्घृणा ।
ज्ञान-विज्ञानमास्तिक्यमेतद्, ब्राह्मणस्य लक्षणम्॥११८॥

देवपूजा दयादानं, दाक्षिण्यं दम दक्षते ।
यस्यैते षड दकाराः स्युः; स देवांशी नरः स्मृतः ११९

नास्ति ज्ञानसमो दीपः, सर्वान्धकारो नाशते ।
स्वर्गे भूमौ च पाताले, स्थाने स्थाने च दृश्यते ॥१२०॥

भिक्षुका नैव याचन्ते, बोधयति दिने दिने ।
दीयतां दीयतां किञ्चिद्दातुः, फलमीदृशम् ॥ १२१॥

हस्तादपि न दातव्यं, गृहादपि न दीयते ।
परोपकरणार्थाय, वचने किं दरिद्रता ? ॥ १२२ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



यावज्जीवं सुखं जीवेद्, ऋणं कृत्वा घृतं पिबेत् ।
भस्मीभूतस्य देहस्य, पुनरागमनं कुतः ? ॥ १२३ ॥

अनभ्यासे विषं शास्त्रं, अजीर्णे भोजनं विषम् ।
दरिद्रस्य विषं गोष्ठी, वृद्धस्य तरुणी विषम् ॥ १२४ ॥

यस्य नास्ति स्वयं प्रज्ञा, शास्त्रं तस्य करोति किं ? ।
लोचनाभ्यां विहीनस्य, दर्पणः किं करिष्यति ? ॥१२५॥

न कार्या सर्व हिंसा, नरकस्येव दूतिका ।
परपीडा कृतः पुंसः, प्रत्यासन्नो न धर्मराट् ॥ १२६ ॥

कीटिका संचितं धान्यं, मक्षिका संचितं मधु ।
कृपणे संचितं वित्तं, तदन्यैरेव भुज्यते ॥ १२७ ॥

अनृतं साहसं माया, मूर्खत्व मतिलोभता ।
अशौचं निर्दयत्वं च, स्त्रीणां दोषाः स्वभावजाः ॥१२८॥

आशाया ये दासाः, ये दासा सर्वलोकस्य ।
आशा येषां दासी, तेषाम् दासायते लोकः ॥ १२९ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



एक तडागे यद्यपि, पिबति भुजङ्गो जलं तथा गौश्च ।
परिणमति विषं सर्पे, तदेव गवि जायते क्षीरम् ॥१३०॥

यो दद्यात्कांचनं मेरु, कृत्स्नां हिंसां परित्यजेत् ।
एकस्य जीवितं दद्या-न्न च तुल्यं युधिष्ठिर ! ॥ १३१ ॥

षट्पदः पुष्पमध्यस्थो, यथा सारं समुद्धरेत् ।
तथा सर्वेषु कार्येषु, सारं गृह्णाति बुद्धिमान् ॥ १३२ ॥

नष्टं नैव मृतं चैव, नानुशोचन्ति पण्डिताः ।
पण्डितानां जडानां च, विशेषोऽयमतः स्मृतः ॥ १३३ ॥

एकेन शुष्कवृक्षेण, दह्यमानेन वह्निना ।
दह्यते काननं सर्वं, दुष्पुत्रेण कुलं तथा । ॥ १३४ ॥

वाणी रसवती, यस्य भार्या प्रेमवती सती ।
लक्ष्मी दानवती, यस्य सफलं तस्य जीवितम् ॥ १३५ ॥

किं कुलेन विशालेन, विद्याहीनस्य देहिनः ।
अकुलीनोऽपि विद्यावान्, विबुधैरपि पूज्यते ॥ १३६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



प्रशांतं दर्शनं यस्य, सर्वभूताभयप्रदम् ।
मांगल्यं च प्रशस्तं च, शिवस्तेन विभाव्यते ॥ १३७ ॥

महत्त्वादीश्वरत्वाच्च, यो महेश्वरतां गतः ।
रागद्वेषविनिर्मुक्तं, वंदेऽहं तं महेश्वरम् ॥ १३८ ॥

महाज्ञानं भवेद्यस्य, लोकालोकप्रकाशकम् ।
महादया दमो ध्यानं, महादेवः स उच्यते ॥ १३९ ॥

दर्शनज्ञानयोगेन, परमात्मायमव्ययः ।
परा क्षान्तिरहिंसा च, परमात्मा स उच्यते ॥ १४० ॥

असारे खलु संसारे, सारं श्वशुर मंदिरम् ।
हरो हिमालये शेते, हरिः शेते महोदधौ ॥ १४१ ॥

नाहं जानामि केयूरे, नाहं जानामि कुण्डले ।
नूपुरे त्वभिजानामि, नित्यं पादाभिवन्दनात् ॥ १४२ ॥

प्रदोषे दीपकश्चन्द्रः, प्रभाते दीपको रविः ।
त्रैलोक्ये दीपको धर्मः, सुपुत्र कुल दीपकः ॥ १४३ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



नहि सत्यात्परो धर्मो, नानृतात्पातकं परम् ।
नहि सत्यात्परं ज्ञानं, तस्मात् सत्यं समाचरेत् ॥ १४४ ॥

कु पुत्रेण कुलं नष्टं, जन्म नष्टं कु भार्यया ।
कु भोजनेन दिनं नष्टं, पुण्यं नष्टं कु कर्मतः ॥ १४५ ॥

खलः करोति दुर्वृत्त, नूनं फलति साधुषु ।
दशाननोऽहरत सीतां, बन्धं प्राप्तो महोदधिः ॥ १४६ ॥

ऋणकर्ता पिता शत्रुः, माता च व्यभिचारिणि ।
भार्या रुपवती शत्रुः पुत्रः शत्रु रपण्डितः ॥ १४७ ॥

यौवनं सफलं भोगैः भोगाः, स्युः सफला धनैः ।
तद्विना मानुषं जन्म, जायते वन पुष्पवत् ॥ १४८ ॥

आधयो व्याधयो विघ्ना, दुःस्वप्नाः कु ग्रहा ग्रहाः ।
दुर्ज्जना दुष्ट शकुना, बाधते नैव धार्मिणाम् ॥ १४९ ॥

एकोऽपि गुणवान् पुत्रो, निर्गुणैः किं शतैरपि ।
एकश्चन्द्रो जगन्नेत्रं, नक्षत्रैः किं प्रयोजनम् ॥ १५० ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



यच्चिन्त्यमानं न ददाति युक्तिं प्रत्यक्ष तो नाप्यनुमान तश्च ।
तद् बुद्धिमान् कोनु भजेत लोके गोश्रृंङ्गत क्षीर समुद्भवो न १५१

नैक पुष्पंद्विधा कुर्या-न्नछिन्द्यात् कलिकामपि ।
पंपकोत्पल भेदेन, भवेद्दोषो विशेषतः ॥ १५२ ॥

क्षणेरुष्टः क्षणे तुष्टो, रुष्ट तुष्ट क्षणे क्षणे ।
अव्यवस्थित चित्तस्य, प्रसादोऽपि भयंङ्करः ॥ १५३ ॥

टका धर्म ष्टका कर्म, टकाहि परमं पदम् ।
यस्य गृहे टका नास्ति, हा ! टका टक टकायते ॥ १५४ ॥

देव पूजा गुरुपास्ति, स्वाध्याय संयम स्तपः ।
दानं चेति गृहस्थानां, षट् कर्माणि दिने दिने ॥ १५५ ॥

चेरत् माधुकरीं वृत्तिमपि, म्लेच्छ कुलादपि ।
एकान्नं नैव भूञ्जत, बृहस्पति समादपि ॥ १५६ ॥

येलुब्ध चित्ता विषयादिभोगे, बहि र्विरागा हृदिबद्धरागाः ।
तेदाम्भिका वेष भृतश्चधूर्ता, मनांसि लोकस्य तु रञ्जयन्ति १५७

For Private And Personal

लेखनी पुस्तकिदारा, पर हस्ते गता गता ।
आगता यदि भाग्येन, हष्टा नष्टा च मर्दिता ॥ १५८ ॥

दुर्जनः परिलर्तव्यो, विद्यया भूषितोऽपि सन् ।
मणिनालंकृतः सर्पः किमसौ न भयंकरः ॥ १५९ ॥

आलस्य हि मनुष्याणां, शरीरस्थो माहात्रिपुः ।
नास्त्युद्यम समो बन्धुः कृत्वायं तापसीदति ॥ १६० ॥

को न याति वशं लोके मुखे पिण्डेन पूरितः ।
मृदङ्गो मुख लेपेन करोति मधुर ध्वनिम् ॥ १६१ ॥

भोगा न भुक्ता वयमेव भुक्ता स्तपो न तप्तं वयमेव तप्ताः ।
काला न यातो वयमेव याता स्तृष्ण न जीर्णा वयमेव जीर्णाः १६२

चला लक्ष्मीश्चलाः प्राणाश्चले जीवित यौवने ।
चलाचले च संसारे धर्म एको हि निश्चलः ॥ १६३ ॥

कनक कान्ता सूत्रेण वेष्टितं सकलं जगत् ।
तासुतेषु विरक्तो यो भुजो परमेश्वरः ॥ १६४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



पुरुषस्य जरा पंथा, अश्वानां मैथुनं जरा ।
अमैथुनं जरा स्त्रीणां, वस्त्राणां वमलं जरा ॥ १६५ ॥

वोह कौनसा उकदा है, जो वा हो नहीं सकता ? ।
हिम्मत करे इन्सान, तो क्या हो नहीं सकता ? ॥ १६६ ॥

तुझे देखकर औरोंको, किन आंखों से हम देखें ?
वे आंखें फूट जायें, औरोंको जिन आंखों से हम देखें १६७

जमाना है नाम मेरा, सभी को बतादूंगा ।
न माने बात जो मेरी, उसी को चखादूंगा ॥ १६८ ॥

बहता पानी निर्मला, खड़ा सो गंदा होय ।
साधू तो रमता भला, दाग न लागे कोय ॥ १६९ ॥

रक्त लगे कपडे, जामा होवे पलीत ।
जे रक्त पीवें मानुषा, तिन क्यों निर्मल चित्त ॥ १७० ॥

फूट नाशका मूल है, फूट मत करो कोय ।
फूट पडी नृप हिंद में, दीयो देश को खोय ॥ १७१ ॥

For Private And Personal

वशीकरण यह मंत्र है, तज दे वचन कठोर
तुलसी मीठे बोलसे, सुख उपजे चउ ओर ॥ १७२ ॥

जबराइका पेंडा न्यारा, कोई मत मानो रीस ।
सब देवता शीष पूजावे, लिंग पूजावे ईश ॥ १७३ ॥

भंग वेचीथी जा दीना, मूरखा वेचाथा ता दीना ।
खबर पड़गी ता दीना, रंगरोट कटेगो जा दिना ॥ १७४ ॥

घर नहि तो मठ बनाया, धंधा नहि तो फेरी ।
बेटा नहि तो चेला मुंडा, ऐसी माया घेरी ॥ १७५ ॥

जब तक तेरे पुन्यका, ओर पता नहि करार ।
तब लग गुना माफ है, अवगुण करो हजार ॥ १७६ ॥

पापी दृष्टि जीवने, धर्म वचन न सुहाय ।
के ऊंधे के लडपडे, के उठके घर जाय ॥ १७७ ॥

नारी कपटकी कोथली, नारी कपटकी खान ।
जे नारी के वश पड्या, ते न तर्या संसार ॥ १७८ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



धर्म करत संसार सुख, धर्म करत नवनिध ।
धर्म पंथ साधन विना, नर तिर्यंच समान ॥ १७९ ॥

जे माणस जेणीपरे, समजे धर्मनो सार ।
पंडित जन तेनी परे, समजावे निरधार ॥ १८० ॥

सबसे हीलना सबसे मीलना, सबका लेना नाम ।
सबसे हाजी हाजी करना, बसना अपना गांव ॥ १८१ ॥

हमारें जो भक्त है, तुम्हारे है वो ठक्त ।
तुम्हारे जो भक्त है, हमारे है वो ठक्त ॥ १८२ ॥

धर्म घटे धन घटे, घटत घटत घट जाय ।
धर्म बढे धन बढे, बढत बढत बढ जाय ॥ १८३ ॥

शरते करडे कुतरो, बे शरते मारे वाघ ।
विश्वासे मारे वाणियो, चगदायो करडे नाग ॥ १८४ ॥

टकाही धर्म है टकाही कर्म है, टका स्वर्गका दाताजी ।
टकाही मनोरथ पूर्ण करेगा, टका चढायो माताजी ॥१८५॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



भय त्यां कहीं न मानवो, ज्यां न होय ज्ञातिजन पास ।
कुहाडी काष्ठ विना, कदि न करे तरुवर नाश ॥ १८६ ॥

निज धर्म जातिका, जिसको नहि अभिमान है ।
वह नर नहि वीन पुंछक, और मृतक समान है ॥ १८७ ॥

कोट डीए नाणां कदि भले बेसे, पण धर्म विना धन शोभे नहि ।
सोले श्रृंगार सजे भले सुंदरी, पण नाक विना नारी शोभे नहि

कितनेक मुफलिस हो गये, कितनेक तवंगर हो गये ।
खाख में जब मील गये, तब दोनू बराबर हो गये ॥१८९॥

पैसो मारो परमेश्वर, कायडी मारो गुरु ।
छोकरां मारां संत साधू, सेवा किसकी करु ॥ १९० ॥

शठने तो शिक्षा विना, कदि न आवे सान ।
कहीए खरने करगरी, तो न तजे तोफान ॥ १९१ ॥

लांचे लोको लूटवा, तजी खावुं हराम ।
लायक जन लायक नहिं, कोली भीलका काम ॥ १९२ ॥

For Private And Personal

ब्राह्मन भये तो क्या भये, गले में डाला सूत ।
आत्मज्ञान की खबर नहीं, भये श्मशान का भूत ॥१९३॥

गुरु गोविंद दोनूं खडे, किसकुं लागू पाय ।
बलिहारी गुरु देवकी, जीने गोविंद दियो बताय ॥ १९४ ॥

काम क्रोध मद लोभकी, जब लग मनमें खान ।
तब लग पंडित मूर्ख हि, सब हि एक समान ॥ १९५ ॥

सासरा सुख वासरा, दो दिनका आसरा ।
तीसरे दिन रहेवेगा, तो खावे खासरा ॥ १९६ ॥

चलनो भलो न कोस को, दुहिता भली एक नार ।
मंगना नहीं सगा बापसे, जो रखावे प्रभू टेक ॥ १९७ ॥

कबीर कहे कमालकुं, दो बातें शीख ले ।
कर साहेब की बंदगी, भूख्या को अन्न दे ॥ १९८ ॥

जीव जीवके आशरे. जीव करत है राज ।
तुलसी रघुवीर आशरे क्यु बगडेगो काज ॥ १९९ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



माता पासे बेटा मागे, कर बकरे का साटा ।
अपना पुत खीलावन चाहे, पुत्त दूजेका काटा ॥ २०० ॥

तुलसी इण संसार में, भात भातके लोक ।
सबसे हीलमील चालीए, नदी नाव संयोग ॥ २०१ ॥

पंडित भये मसालची, बातां करे बनाय ।
औरन को उजला करे, आप अंधेरे जाय ॥ २०२ ॥

मीठा बोला मानवी, केम पतीजयां जाय ।
मोर कंठ मधुरो लवे, साप समुलो खाय ॥ २०३ ॥

सासु तीरथ ससरा तीरथ, आधा तीरथ साली ।
मा बापको लातज मारु, सब तीरथ घरवाली ॥ २०४ ॥

भली करत लगत विलंब, विलंब न बूरे विचार ।
भवन बनावत दिन लगत, ढहत न लागत वार ॥ २०५ ॥

कार्तिक मासके कुतरे, तजे अन्न अरु प्यास ।
तुलसी वाकी क्या गति, जिनके बारे मास ॥ २०६ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



परधन पत्थर जाणीये, परस्त्री मात समान ।
इतने किये हरि न मीले, तो तुलसीदास जमान ॥ २०७ ॥

पठन गुनन कवि चातुरी है, सब बात सहल्ल ।
मदन दहन मन वशीकरन, गगन चलन मुसकिल ॥२०८॥

बात बात सब एक है, बतलावन में फेर ।
एक पवन बादल मीले, एक ही देत बिखेर ॥ २०९ ॥

जीभ्यामें अमृत बसे, विष भी उनके पास ।
एक बोल से लाख ल्ये, एक लाख विनाश ॥ २१० ॥

कविजन किमही न छंडीए, जो होय हयडे सान ।
मेरु टाळी कर्कर करे, कर्कर मेरु समान ॥ २११ ॥

जिनमूर्ति मानी नही, पूजत आण्यो द्वेष ।
ते नर मर गंडक हूवा, रोवे झालर देख ॥ २१२ ॥

जाति न पुछो साधुकी, जो पुछो तो ज्ञान ।
मोल करो तरवार का, परा रहन दो म्यान ॥ २१३ ॥

For Private And Personal

दुःखमें सुमरिन सब करे, सुख में करे न कोय ।
जो सुख में सुमरिन करे, तो दुःख काहेको होय ॥ २१४ ॥

संपत गई ते सांपडे, गया वलत है व्हाण ।
गत अवसर आवे नहिं, गया न आवे प्राण ॥ २१५ ॥

काल करे सो आज कर, आज करे सो अब्ब ।
अवसर बित्यो जात है, फिर करेगो कब्ब ॥ २१६ ॥

गेहु गोरस गोरडी, गज गुणियल ने गान ।
छ गग्गा जो इहां मीले, तो सग्गह शुं शुं काम ॥ २१७ ॥

जाकी जैसी बुद्धि है, वैसा कहे बनाय ।
वाको बुरो न मानीए, लेने कहां से जाय ॥ २१८ ॥

छोटे नर के पेट में, रहे न मोटी बात ।
पाशेरी के पात्र में, कहां से शेर समात ॥ २१९ ॥

मरन मरन सबको कहे, बहुरी मरन न कोय ।
कबीर मरन ऐसा करो, बहुरी मरन न होय ॥ २२० ॥

अति भला नहिं बोलना, अति भला न चूप ।
अति भला नहि वरसना, अति भला नहि घूप ॥ २२१ ॥

अंधाने अंधो कहे, वसमुं लागे वेण ।
धीरे धीरे पुछीए, शाथी खोया नेण ॥ २२२ ॥

मुरख जाणे मुज विना, चाले नहि व्यवहार ।
गया युधिष्ठर राम नल, पण चाळे संसार ॥ २२३ ॥

राजा कोनो गोठीओ, जोगी कोनो मित्त ।
वेश्या कोनी नार है, त्रण मित्त कुमित्त ॥ २२४ ॥

अन्यनी निंदा जे करे, तम आगळ जे आज ।
वलते करशे ते नकी, तम निंदानु काज ॥ २२५ ॥

बड़ा बडाई ना करे, बड़ा न बोले बोल ।
हीरा मुखसे ना कहे, लाख हमारा मोल ॥ २२६ ॥

अंक विना अगणित मीडां, मिथ्या जेम मनाय ।
विवेक सद्गुण विण त्यम-विद्या व्यर्थ गणाय ॥ २२७ ॥

संगत बिचारी शुं करे, जेनु हृदय कठोर ।
नव नेजा पानी चडे, पत्थर न भींजे कोर ॥ २२८ ॥

तुलसी हाय गरीब की, कबू न खाली जाय ।
मुवे ढोर के चामसे, लुहा भस्म हो जाय ॥ २२९ ॥

सदैव जे साथ रहे, तेमां खटपट थाय ।
दांत तळे कोइक दिने, जीभ जरुर कचराय ॥ २३० ॥

निंदक हमेरा मत मरो, मरो हमेरा पूत ।
वो नरके ले जायेगा, वो सरजेगा भूत ॥ २३१ ॥

जब तुं आयो जगतमें, जगत हंसे तुं रोय ।
अब तो एसा कर चलो, तुं हंसे जग रोय ॥ २३२ ॥

कबीरा सोही पीर है, जो जाणे पर पीर ।
पर पीर जीन्हे जानी नहीं, सो काफर बे पीर ॥ २३३ ॥

नावमें नदीयां डुब गई, कुवेमें लग गई आग ।
कीचड पानी जल गया, मछली रह गई साफ ॥ २३४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



गुल गये गुलशन गये, जगमें धतूरे रह गये ।
चाहनेवाले ना रहे, उल्लु के पठ्ठे रह गये ॥ २३५ ॥

आदमको खूदा मत कहो, खूदा आदम नहि ।
लेकिन खूदा के नूर से, आदम जूदा नहि ॥ २३६ ॥

जो कोई तुजको शूल बावे, वो तु उसीको फूल ।
तुजको फूल का फूल मीलेगा, उसे बबूल के बबूल ॥२३७॥

कबीर कहे वनमें जाउ पता न तोडुं, न कोई जीव सताउ ।
पतों पतों में साहिब मोरा, सब को शीष नमाऊ । २३८॥

मुजे सताले निबल जानके कभी समय वह आयगा ।
अपनी करनी का मुंजसे ही, नीच शीघ्र फल पायगा २३९

बच्चू याद करो उस दीनको, अब समय हमारा आया है ।
देखो हमारी सबल सूंढको, इतना क्यों घबराया है ॥२४०॥

तुलसी हाय गरीबकी, कबू न खाली जाय ।
मुवे ढोरके चाम से, लूहा भस्म हो जाय ॥ २४१ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



बहुत वणिज बहुत बेटियां, दो नारी भरतार ।
उसको क्या है मारना, मार रहा किरतार ॥ २४२ ॥

पोथी पढ पढ जग मुआ, जोगी भया न कोय ।
ढाइ अखर प्रेमके पढै, सो जोगी होय ॥ २४३ ॥

अन्नन्न देश जाया, अन्नन्नाहार वढ्ढिय शरीरा ।
जिण सासणे पवन्ना, सव्वे ते बन्धवा भणिया ॥ २४४ ॥

आरंभे नत्थि दया, महिला संगेण नास ए बम्भं ।
संकाए समत्तं, पव्वज्जा दव्व गहणेणं ॥ २४५ ॥

बहुआ नर दीसंति, नारी नई बुड्डवि गया ।
विरला केई तरंति, तारुण्णय तारु हूआ ॥ २४६ ॥

महिला कूड चरित्त, बंभ पुण पार न जाणई ।
दिनि डरपई दोरडई, रयणि विसहर फण मोडई ॥ २४७ ॥

जहा लाहो तहा लोहो, लाहा लोहो पवड्ढइ ।
दो मास कणय कज्जं, कोडिए विन निट्ठियं ॥ २४८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



कम्मुणा बंभणो होइ, कम्मुणा होइ खत्तिऊ ।
कम्मुणा वइसा होइ, सुद्दो होइ कम्मुणा ॥ २४९ ॥

जहां पौपं जले जायं, नो वि लिप्पइ वारिणा ।
एवं अलित्त कामेहिं, तं वयं बंभमाहणं ॥ २५० ॥

नवि मुंडिएण समणो, न ओंकारेण बंभणो ।
न मुणि रण वासेण, कुसीचीरेण न तावसो ॥ २५१ ॥

जीव वधंता नरग गई, अवधंता गई साग ।
हुं जाणुं दो वाटडी, जिण भावे तिण लग्ग ॥ २५२ ॥

नवि मारीयई नवि चोरीयई, परदारा गमण निवारीयई ।
थोअं थोअं दायियई, "तो" स्वर्गे जटा जट जायियई ॥२५३॥

સમાપ્ત

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



# त्रिमूर्ति कैसे?

एकमूर्तिस्त्रयो भागा ब्रह्मविष्णुमहेश्वराः ।
परस्परं विभिन्ना नामेकमूर्तिः कथं भवेत् ? ॥ १ ॥

कार्यं विष्णुः क्रिया ब्रह्मा, कारणं तु महेश्वरः ।
कार्यकारणसंपन्ना, एकमूर्तिः कथं भवेत् ? ॥ २ ।

प्रजापतिसुतो ब्रह्मा, माता पद्मावती स्मृता ।
अभिजिज्जन्मनक्षत्रमेकमूर्तिः कथं भवेत् ? ॥ ३ ॥

वसुदेवसुतो विष्णुर्माता च देवकी स्मृता ॥
रोहिणी जन्म नक्षत्रमेकमूर्तिः कथं भवेत् ? ॥ ४ ॥

पेढालस्य सुतो रुद्रो, माता च सत्यकी स्मृता ।
मूलं च जन्म नक्षत्रमेकमूर्तिः कथं भवेत् ? ॥ ५ ॥

रक्तवर्णो भवेद् ब्रह्मा, श्वेतवर्णो महेश्वरः ।
कृष्णवर्णो भवेद् विष्णुरेकमूर्तिः कथं भवेत् ? ॥ ६ ॥

अक्षसूत्री भवेद् ब्रह्मा, द्वितीयः शूलधारकः ।
तृतीय शंखचक्रांक, एकमूर्तिः कथं भवेत् ? ॥ ७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir



चतुर्मुखो भवेद् ब्रह्मा, त्रिनेत्रोऽयं महेश्वरः ।
चतुर्भुजो भवेद्विष्णुरेकमूर्तिः कथं भवेत् ? ॥ ८ ॥

मथुरायां जातो ब्रह्म, राजगृहे महेश्वरः ।
द्वारावत्यामभाद्विष्णुरेकमूर्तिः कथं भवेत् ? ॥ ९ ॥

हंसयानो भवेद् ब्रह्मा, वृषयानो महेश्वरः ॥
गरुडयानो भवेद्विष्णुरेकमूर्तिः कथं भवेत् ? ॥ १० ॥

पद्महस्तो भवेद् ब्रह्मा, शूलपाणिर्महेश्वर ॥
चक्रपाणिर्भवेद्विष्णुरेकमूर्तिः कथं भवेत् ? ॥ ११ ॥

कृते जातो भवेद् ब्रह्मा, त्रेतायां च महेश्वरः ।
द्वापरे जनितो विष्णुरेकमूर्तिः कथं भवेत् ? ॥ १२ ॥

ज्ञानं विष्णुस्सदा प्रोक्तं, चारित्रं ब्रह्म उच्यते ॥
सम्यक्त्वं तु शिवं प्रोक्तमर्हन्मूर्तिस्त्रयात्मिका ॥ १३ ॥

मुक्तो न करोति जगन्न कर्मणा बध्यते वितरागः ।
रागादियुतः सतनुर्निबध्यते कर्मणा वश्यम् ॥ १४ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

# शुद्धिपत्रक

| पेज | पंक्ति | अशुद्ध | शुद्ध |
|---|---|---|---|
| १ | ६ | अङ्ग | अङ्गं |
| १ | १० | श्र | श्रु |
| १ | ११ | ऽप्रमाणम् | प्रमाणम् |
| २ | ८ | य | प्य |
| २ | १४ | च्चियन्तितं | यद्च्चियन्तितं |
| २ | १५ | म्पु | म्यु |
| ४ | ३ | चिः | चित्तः |
| ११ | ९ | मायाः | क्षमायाः |
| १३ | २ | कष्ट | कण्ठ |
| १८ | ३ | र्वि | वि |
| २१ | १५ | ष | प |
| २२ | १३ | द् | द |

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal